श्री उमाष्टकं

श्री उमाष्टकं

ॐ

ॐ नम उमा भगवत्यै |
चामरं दक्षिणे हस्ते कमलं चोत्तरे तथा |
रक्तांबरा दयामूर्तिः प्रसन्नोमास्तु सर्वदा ||1||

सुवर्णसदृशीं गौरीं भुजद्वय-समन्वितां |
नीलपद्मं हि वामेन पाणिना बिभ्रतीं सदा ||2||

दिवाकर-शतद्युतिं जननीं भुक्तिमुक्तिदाम |
सुमुखीं वरदां देवी सिंहस्थां परिपूजयेत् ||3||

भक्ताय शिवरामाय स्नुषा ब्राहस्य सन्निधौ |
स्वप्ने स्वं दर्शयामास रूपं वैराग्यदं शुभं ||4||

काकरूपा ततो देवी भक्तानुग्रहकाम्यया
ओंकाररूपसंभूता पंचधाऽभयदायिनी ||5||

प्रादुर्भूता नदीरूपा भक्तानां फलदायिनी |
ओंकाररूपसदृशी पंचधा दिव्य-कुंडजा ||6||

भक्तः प्रभावयुक्तायाः स्वयमानंदनामकः |
देव्या भवनं निर्मातुं शिलान्यासं चकार सः ||7||

ओंकाररूपेण विराजमाना सा पूजकानां वरदायिनी च |
रक्तांबरा दिव्यवपुः उमाख्या सा ब्रह्मरूपा विजयस्य दात्री ||8||

इति उमाष्टकं संपूर्णं |